S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



**Stammer,** *v. i.* स्खल् 1 P, असमंजसं जल्प् 1 P, स्खलद्वाक्येन-अस्पष्टवर्णैः-अस्फुटस्वरेण-गद्गदवाचा-वद् 1 P, अस्पष्टं-अस्फुटं-वच् 2 P. **-er,** *s.* अव्यक्त-अस्पष्ट-वादिन् *m.*, स्खलत्-गद्गद-वादी, स्खलितस्वरः. **-ing,** *s.* स्खलनं, अस्पष्ट-अव्यक्त-भाषणं.

**Stamp,** *s.* मुद्रा, मुद्रिका, मुद्रायंत्रं. **2** मुद्रा, चिह्नं, अंकः, न्यासः, पदं. **3** पादप्रहारः -आघातः-विष्टंभः. **4** स्व-,रूपं,आकारः,आकृति *f.*, प्रकृति *f.*, संस्कारः; 'of the common s.' सामान्यप्रकृति, प्राकृत; 'of high s.' महाप्रभाव, महानुभाव; 'of the same s.' समानरूप, तुल्य-स्वभाव-प्रकृति. **-v.** पादेन-पादतलेन-प्रह् 1 P or आ-अभि-हन् 2 U, पादप्रहारं कृ 8 U. **2** अंक् 10, मुद्रयति-चिह्नयति- ( (D.), लांछ् 1 P; 's.-ed with infamy' दुष्कीर्तिचिह्नित, उपक्रोशमलीमस, अपयशोंकित. **3** क्लृप् c., रच् 10, संवि-धा 3 U. **4** पादतलेन मृद् 9 P or चूर्ण् 10 or पिष् 7 P. **-ed,** *a.* अंकित, लांछित, समुद्र, कृतमुद्र, मुद्रांकित.

**Stampede,** *s.* ससंभ्रमं पलायनं.

**Stanch,** *a.* दृढ, स्थिर, धीर, अचल; 'a s. adherent' बद्धानुरागः सहायः, दृढपक्षः; *See* **Firm.** **-v.** *t.* प्रवाहं-प्रस्रावं स्तंभ् 9 P or रुध् 7 U, शुष् c. **-v.** *i.* शुष् 4 P, स्तब्धप्रवाह *a.* भू 1 P.

**Stanchion,** *s.* क्षुद्रस्तंभः-स्थाणुः.

**Stand,** *v. i.* स्था 1 P, पद्भ्यां स्था. **2** वृत् 1 A, विद् 4 A, अव-स्था 1 A; *See* **Remain.** **3** भू 1 P,अस् 2 P, वृत्. **4** निवृत्, विरम् 1 P, स्तंभ् pass., स्थिर-रुद्धगति-कुंठित- *a.* भू; 'this will remain a s.-ing stigma (on me)' वचनीयमिदं व्यवस्थितं (K. iv. 21); 'this argument will not s. long' इयं युक्तिर्न चिरं स्थास्यति, अचिरात् खंडयिष्यते. **-v.** *t.* सह् 1 A, मृष् 4 P, 10; *See* **Bear;** 'to s. the test' निकषपरीक्षां तॄ 1 P. निकष परीक्ष् pass. **2** उप-नि-रुध् 7 U; प्रति-वि-रुध्. **-against,** प्रत्यव-स्था, बाध् 1 A; विरुध् *See* **Oppose. -by,-near,** साहाय्यं कृ, संरक्ष् 1 P, परि-,त्रै 1 A. उपकृ; अनुग्रह्. **2** स्था, अव-स्था; अनुरुध् 4 A, अनुवृत्; 's. by your lord's orders' शासने तिष्ठ भर्तुः (V. 5); *See* **Obey. -for,** स्थाने-भूमौ स्था or वृत्. **2** पदं आप् desid. ( ईप्सति ). **-off,** अपसृ 1 P, दूरतः स्था. **-on,** आ-अव-लंब् 1 A, आ-स्था (A). आश्रि 1 U. **-out,** प्रलंब्, उत्तम् 1 P; *See* **Project. 2 Persist,** q. v **-over,** व्याक्षिप् pass. **2** अधि-ष्ठा, अध्यास् 2 A; 'his name s. s over all' स सर्वेषां मूर्ध्नि तिष्ठति. **-to,** संवद् 1 P; 'does not s. to reason' सयुक्तिकं-सोपपत्तिकं न भाति. **-up,** उत्था. **-s.** आधारः, भाजनं, पात्रं, उपष्टंभः, आश्रयः; 'ink-s.' मसीपात्रं-धानी; 's. of a lamp' दीपाधारः-वृक्षः. **2** मंचः. **3** अव-,स्थानं, पदं, स्थिति *f.*, अव-,स्तंभः, गतिरोधः-स्तंभः, कुंठनं; 'come to a s.' स्तब्ध-शांत-*a.* भू; 'bring to a s.' स्तंभ् 9 P or c., गतिं रुध् or वृ c.; at a s.-still' कुंठित, प्रतिहत-रुद्ध-गति; 'make a s. against' प्रतिबंध् 9 P, प्रत्यव-स्था (A), प्रति-विरुध्. **-ing,** *s.* अव-,स्थितिः,अवस्थानं, स्थायित्वं; 'of long s.' चिरस्थायिन्, दीर्घकालीन, पुराण; *See* **Old. 2** स्थानं, पदं, आस्पदं,पदवी, प्रतिष्ठा; 'high s.' उच्चपदं, महती प्रतिष्ठा 'who has obtained a s. लब्धप्रतिष्ठः **-a** सनातन,चिर-नित्य-स्थायिन्; *See* **Lasting. 2** स्थित, उत्थित, दंडवत् स्थित. **3** स्थ, स्थायिन्, वर्तिन्, अव-,स्थित in comp. 'with the hair s. on their end' पुलकित, रोमांचित, कंटकित.

**Standard,** *s.* ध्वजः, पताका, केतुः, केतन, वैजयंती; 's.-bearer' ध्वजिन्, पताकिन्. **2** मानं, प्र-परि-°, सूत्रं, विधिः, नियमः; 'a s. person' प्रमाणपुरुषः, प्रमाणं; 's. authors' प्रमाणभूताः (विशिष्टाः) ग्रंथकृतः.

**Stanza,** *s.* श्लोकः.

**Staple,** *a.* प्रधान, मुख्य, विशिष्ट. **-s. Market,** q. v. **2** लोहपुटः.

**Star,** *s.* तारा, तारका, नक्षत्रं, ज्योतिस् *n.*, उडुः, भं, ऋक्षं; 'the s. s collectively' उडुगणः, भगणः; 'shooting s.' नक्षत्रपतनं, उल्का; 's. under which one is born' जन्मनक्षत्रं; 's.-light' ताराप्रकाश, तारकित; (*s.*) ताराप्रकाशः. **-v.** *t.* तारासनाथ-*a.* कृ 8 U, तारकयति (D.); 'the breast s. ed with drops of tears' अश्रुबिंदुतारकितपयोधरा; 'the s.-red heaven' तारासनाथं-तारकितं-नभः. **-ry,** *a.* तारासंकुल-मय (यी *f.*)-आकीर्ण-सनाथ, तारकित. **2** तारानिभ, तारा in comp.; 's. firmament' नभोमंडलं, नक्षत्रमंडलं.

**Starboard,** *s.* नौदक्षिणपार्श्वः.

**Starch,** *s.* मंडः-डं. **-v.** *t.* मंडयति (D.), मंडेन लिप् 6 P.

**Stare,** *v. i.* सूक्ष्मं-बद्धलक्ष्यं-स्थिरदृष्ट्या-अनिमिषलोचनाभ्यां-प्रेक्ष् 1 A or दृश् 1 P or आलोक् 1 A, 10, अनन्यदृष्ट्या निरीक्ष्, स्निग्धं निर्वर्ण् 10. **-s.** स्थिरदृष्टि *f.*, बद्ध-अनिमेष-दृष्टिः, अनन्यदृष्टिः. **-ing,** *a.* बद्ध-स्थिर, अनन्य-अनिमेष-दृष्टि-बद्धलक्ष्य, विवृत-उत्फुल्ल-नयन-लोचन &c., उन्मीलिताक्ष.

**Stark,** *a.* समग्र, पूर्ण, केवल, अत्यंत, अशेष. **2** रूक्ष, विषम. **-adv.** केवलं, अत्यंतं.

**Start,** *v. i.* प्र-स्था 1 A, प्र-या 2 P, प्र-,चल् 1 P; यात्राभिमुखं प्रवृत् 1 A 's. on a journey' (Mal. 6). **2** स्फुर् 6 P, सहसा

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007